॥ નવદુર્ગાસ્તોત્ર ॥

દેવી શૈલપુત્રી ।
વન્દે વાઞ્છિતલાભાય ચન્દ્રાર્ધકૃતશેખરામ્ ।
વૃષારૂઢાં શૂલધરાં શૈલપુત્રી યશસ્વિનીમ્ ॥

દેવી બ્રહ્મચારિણી ।
દધાના કરપદ્માભ્યામક્ષમાલાકમણ્ડલૂ ।
દેવી પ્રસીદતુ મયિ બ્રહ્મચારિણ્યનુત્તમા ॥

દેવી ચન્દ્રઘણ્ટેતિ ।
પિણ્ડજપ્રવરારૂઢા ચણ્ડકોપાસ્ત્રકૈર્યુતા ।
પ્રસાદં તનુતે મહ્યં ચન્દ્રઘણ્ટેતિ વિશ્રુતા ॥

દેવી કૂષ્માંડા ।
સુરાસમ્પૂર્ણકલશં રુધિરાપ્લુતમેવ ચ ।
દધાના હસ્તપદ્માભ્યાં કૂષ્માણ્ડા શુભદાસ્તુ મે ॥

દેવીસ્કન્દમાતા ।
સિંહાસનગતા નિત્યં પદ્માશ્રિતકરદ્વયા ।
શુભદાસ્તુ સદા દેવી સ્કન્દમાતા યશસ્વિની ॥

દેવીકાત્યાયની ।
ચન્દ્રહાસોજ્જ્વલકરા શાર્દૂલવરવાહના ।
કાત્યાયની શુભં દદ્યાદેવી દાનવઘાતિની ॥

દેવીકાલરાત્રિ ।
એકવેણી જપાકર્ણપૂરા નગ્ના ખરાસ્થિતા ।
લમ્બોષ્ઠી કર્ણિકાકર્ણી તૈલાભ્યક્તશરીરિણી ॥

વામપાદોલ્લસલ્લોહલતાકણ્ટકભૂષણા ।
વર્ધનમૂર્ધ્વજા કૃષ્ણા કાલરાત્રિર્ભયઙ્કરી ॥

દેવીમહાગૌરી ।
શ્વેતે વૃષે સમારૂઢા શ્વેતામ્બરધરા શુચિઃ ।
મહાગૌરી શુભં દદ્યાન્મહાદેવપ્રમોદદા ॥

દેવીસિદ્ધિદાત્રિ ।
સિદ્ધગન્ધર્વયક્ષાદ્યૈરસુરૈરમરૈરપિ ।
સેવ્યમાના સદા ભૂયાત્ સિદ્ધિદા સિદ્ધિદાયિની ॥